

# सोमज्योतिः

**Shree Somnath Sanskrit University**
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.shreesomnathsanskrituniversity.info

*University Newsletter*

Issue: **13** Month: **June** Year: **2016**


January 2016 To June 2016

सोमज्योतिः


## अष्टमवार्षिकपदवीदानसमारम्भः तथा अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः उद्घाटनसमारोहः




वामतः मञ्चस्थाः डॉ. दशरथजादवः, प्रो. अर्कनाथचौधरी, श्रीभूपेन्द्रसिंहचुडासमा, श्रीओ.पी.कोहली, श्रीजसाभाईबारडः, डॉ. रामकरणशर्मा, डॉ. पंकजजानी



## कुलपतिवाक्

श्रीसोमनाथसंस्कृतविश्वविद्यालयः निरन्तरं शैक्षिकप्रगतिपथे अग्रेसरतीति दृष्ट्वा मोमुदीति चेतः । राज्यसर्वकारप्रदत्तभौतिकसौविध्येन सह शैक्षणिककार्यजातमपि नितरां प्रशस्यम् । माननीयमुख्यमन्त्रिमहोदया २५ जनवरी २०१६ तिथौ छात्रावास-कुलपतिनिवासभवनयोः लोकार्पणं कृत्वा विश्वविद्यालयस्य प्रगत्यै अभिरुचिं प्रदर्शयामास । दीक्षान्तसमारोहेण सहैव ७-२-२०१६ तमे दिनाङ्के महामहिमशालिना राज्यपालेन श्रीओ.पी.कोहलीमहाभागेन अन्ताराष्ट्रियसंस्कृतसंगोष्ठ्याः त्रिदिवसात्मिकायाः समुद्घाटनं कृतम्। तस्मिन्नेव दिने मान्यशिक्षणमन्त्रिणा श्रीभूपेन्द्रसिंहचुडासमा-महोदयेन साकं महामहिमशालिना राज्यपालमहोदयेन भव्यविश्व-विद्यालयद्वारनिर्माणाय भूमिपूजनपूर्वकं शिलान्यासः कृतः । कार्यमिदं BAPS संस्थाया आर्थिकसहाय्येन क्रियमाणमस्ति । सत्रेऽस्मिन्नेव माननीयशिक्षाराज्यमन्त्रिण्या प्रो. वसुबेन-त्रिवेदिमहोदयया व्यासमूर्तेः अनावरणं विश्वविद्यालये विहितम्।

नेट स्लेट कृते विद्यार्थिनः विश्वविद्यालये प्रशिक्षिताः । पी.जी.डी.सी.ए कार्यशाला, शास्त्रीयकार्यशालाश्चास्मिन् वर्षे सम्पादिताः । तत्र महाविद्यालयप्राध्यापकानां सहभागित्वं प्रशंसनीयमासीत् । अन्ये च शैक्षणिककार्यक्रमाः समायोज्यन्ते इति शैक्षिकभौतिकदृष्ट्या द्रुतगत्या विश्वविद्यालयोऽग्रेसरति इति महान् प्रमोदः । कार्येऽस्मिन् प्राध्यापकाः प्रशासनिकविभागश्च नितरां सहयोगं प्रयच्छन्तीति ते अभिनन्दनीयाः सन्ति।

स्वस्तिश्रीविक्रमाब्द-२०७२ तमे संवत्सरे पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे श्रीसोमनाथ-संस्कृतविश्वविद्यालयपरिसरे अष्टमवार्षिकपदवीदान-समारम्भः अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः उद्घाटनसमारोहश्च सम्पन्नौ । अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया विविधाः कार्यक्रमाः अपि विश्वविद्यालयेन समायोजिताः आसन्।




विद्यावाचस्पतिः (D. Litt.) इति उपाधिं लभमाना डॉ. राजलक्ष्मीभट्ट

प्रतिसंवत्सरमिवास्मिन् संवत्सरेऽपि श्रीसोमनाथसंस्कृत-विश्वविद्यालयः ७-२-२०१६ तमे दिनाङ्के रविवासरे पूर्वाह्णे ११-०० वादने अष्टमवार्षिक-पदवीदानसमारम्भं समायोजितवान् । कार्यक्रमेऽस्मिन् अध्यक्षरूपेण सम्प्राप्ताः आसन् गुजरातराज्यस्य राज्यपाल-महोदयाः माननीयाः कुलाधिपतयश्च प्रो.ओमप्रकाशकोहली-महोदयाः । गुजरातराज्यस्य शिक्षणमन्त्रिणः श्रीभूपेन्द्रसिंह-चुडासमामहोदयाः प्रमुखातिथिरूपेण विराजमानाः आसन् । विशिष्टातिथिरूपेण सम्प्राप्ताः आसन् गुजरातराज्यस्य राज्यकक्षाकृषि-नागरिक-उड्डयनमन्त्रिणः श्री

(अनु. तृतीये पृष्ठे.....)

**Chief Editor**
Prof. Ark Nath Chaudhary

**Publisher**
Dr. Dashrath Jadav

**Editors**
Dr. Lalit Patel
Dr. Satrughna Panigrahi
Dr. Janakisharan Acharya
Dr. Dipesh Katira

**Managing Editor**
Dr. Kartik Pandya

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** *(Bi-annual Newsletter of Shree Somnath Sanskrit University)* from affiliated colleges, recognized study centers & approved research centers of Shree Somnath Sanskrit University in Sanskrit, Hindi or English.

News/Reports of events can be sent on following mail/postal address:

**Address:**
**The Editor**
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist. Gir-Somnath, Gujarat–362 266.
(O) 02876-244532

**E-mail:** sssu.veraval@gmail.com

Statement about the ownership and other particulars about newspapers

**SOMAJYOTIḤ**

**FORM IV**

(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)

1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Bi-annual (Half-Yearly)
3. Printer's Name : **Sudarshan Graphics**
   Nationality : Indian
   Address : Tirupati Avenue, Kankaria, Maninagar, Ahmedabad-380028
4. Publisher's Name : The Registrar
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : The Vice-Chancellor
   Nationality : Indian
   Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266

I, Dr. Dashrath Jadav, Registrar (I/c), Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.

Dr. Dashrath Jadav
Signature of Publisher

## Vice-Chancellor's Diary

| | |
|---|---|
| 07/01/2016 | **Chief-Guest** by Ayurved University, Jodhpur and delivered Keynote Address on “संस्कृत वाङ्मय में विकीर्ण आयुर्वेद”. |
| 09/01/2016 | **Special Guest** at the Rajbhavan, Gandhinagar invited by Sanskrit Seva Samiti in the release of a book entitled as “अनासक्ति कर्मयोग” authored by Dr. Gautambhai Patel. |
| 20/01/2016 | Attended meeting as the member of Rashtriya Sanskrit Parishad (M.H.R.D) in Vijnana Bhavan, New Delhi. |
| 25/01/2016 | Participated in a special programme in view of the 67th Republic Day Celebration at Veraval on the invitation of His Excellence Governor of Gujarat. |
| 26/01/2016 | Participation in the celebration of the 67th Republic Day Celebration at Veraval on the invitation of Government of Gujarat in the presence of Honourable Chief-Minister of Gujarat. |
| 07/02/2016 | - Organized 8th Convocation Ceremony.<br>- *Bhūmi Pūjana* of Main Gate of the University donated by BAPS.<br>- Inauguration of Three Day International Seminar on “Śivatattva in Sanskrit Literature” and “Sanskrit-Kavi-Sammelan”. |
| 09/02/2016 | Presided over the Valedictory Ceremony of Three Day International Sanskrit Seminar. |
| 19/02/2016 | Attended all VC's meeting organized by KCG's AISHE Unit on successful completion of All India Survey on Higher Education. |
| 20/02/2016 | Attended meeting as the member of National Child Protection and Rights Commission (Western Zone) in Goa University, Goa (Panji). |
| 26/02/2016 | **Chief-Guest** in a National Seminar on “चिकित्साज्योतिष” organized by Maharaja Acharya Sanskrit College, Jaipur. |
| 27/02/2016 | **Chief-Guest** in a state level Teachers' & Students' Felicitation Programme organised by Nimbark Sanskrit Parishad, Rajasthan at Rashtriya Sanskrit Sansthan, Jaipur Campus (Rajasthan). |
| 07/03/2016 | **Chief-Guest** in a National Seminar organised by Rashtriya Sanskrit Sansthan, Balahar Campus (Himachal Pradesh). |
| 10/03/2016 | **Chief-Guest** in a National seminar on “कालिदास के काव्यों की शाश्वतता” organised by Workers College, Jamshedpur (Jharkhand). |
| 11/03/2016 | Attended the Presidential Award Ceremony in the Rashtrapati Bhavan, New Delhi. |
| 13/03/2016 | Inaugurated one Conference of Arya Samaj of Porbandar in Veraval. |
| 16/03/2016 | Conferred D.Litt. Degree (2016) to Santaram Maharaj in Santaram Temple, Nadiad. |
| 19/03/2016 | **Special Guest** in a National Seminar on “*Darśanaśāstra*” organized by Shree Ramasundardas Vishwa Sanskrit Vidya Pratisthan, Ramauali (Bihar). |
| 28/03/2016 | **Chief-Guest** in the Valedictory Ceremony of an International Seminar organized by Bhagawat Vidyapeeth, Sola, Ahmedabad. |
| 03/04/2016 | Welcomed and greeted Smt. Smriti Irani, Minister of Human Resource Development Ministry at the VIP Guest House of Somnath. |
| 30/04/2016 | Chaired Executive Council, Academic Council and Finance Committee meetings of the University. |
| 14/05/2016 | Participated in 'Vichar Mahakumbh' at Ujjain on special invitation of the Cultural Ministry of the Government of Madhya Pradesh. |
| 26/05/2016 | Visited the Training Workshop of Sanskrit Bharati at Nadiad and attended the 'विद्वत् परिषद्' meet of Sanskrit Bharati. |
| 02/06/2016 | Attended the meeting of प्रवेशोत्सव - 2016 held Under the Chairmanship of Education Minister, Government of Gujarat. |
| 03/06/2016 | Discussion with Honourable Education Minister through e-conference in the office of Gir-Somnath Collectorate in pursuance of World Yoga Day Celebration. |
| 21/06/2016 | Inaugurated World Yoga Day Celebration in the University campus. |




सोमज्योतेः लोकार्पणं कुर्वन्तः (वामतः) श्रीभूपेन्द्रसिंहचूडासमामहोदयाः, माननीयराज्यपालमहोदयाः, श्रीजशाभाईबारडमहोदयाः च

जशाभाईबारडमहोदयाः । किश्च बहूनां विश्वविद्यालयानां कुलपतिचराः देशविदेशेषु संस्कृतविद्वत्परिषत्सु च सम्मानिताः विद्वांसः श्रीरामकरणशर्ममहोदयाः अस्य कार्यक्रमस्य सारस्वतातिथिपदं समलङ्कृतवन्तः। डॉ. बाबासाहेब-आम्बेडकरमुक्तविश्वविद्यालयस्य कुलपतयः डॉ. पङ्कजजानीमहोदयाः अपि विशेषातिथिपदे व्यराजन्त । माननीयाः कुलाधिपतयः दीक्षान्तमहोत्सवस्य शुभारम्भम् उद्घोषितवन्तः तदनन्तरं कुलपतयः प्रो.अर्कनाथचौधरीमहोदयाः विधिपूर्वकं दीक्षान्तप्रतिज्ञां छात्रेभ्यः कारितवन्तः । तेषामेव करकमलाभ्यां 'सोमज्योतिः' इति विश्वविद्यालयवार्ताप्रकाशनस्य द्वादशाङ्कस्य लोकार्पणं जातम् । अस्मिन्नेव कार्यक्रमे राज्यपालाः प्रो. ओमप्रकाशकोहलीमहोदयाः अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः उद्घाटनकार्यक्रमस्य अनुमतिं प्रदत्तवन्तः मार्गदर्शनं च कृतवन्तः । अस्य कार्यक्रमस्य सफलतायै गुजरातराज्यस्य माननीयमुख्यमन्त्रिण्याः श्रीमत्याः आनन्दीबेनपटेलमहोदयायाः शुभसन्देशं डॉ. पङ्कजजानीमहोदयाः अपठन् । पदवीं लभमानानां महानुभावनां छात्राणां च विवरणं इत्थं वर्तते।

विद्यावाचस्पतिः (D.Litt.) इति उपाधिं लभमानाः महानुभावाः-

(१) डॉ. राजलक्ष्मीभट्टमहोदयाः
(२) प. पूज्याः रामदासजीमहाराजाः

'विद्यावारिधिः' (Ph.D.) इति उपाधिं लभमानाः महानुभावाः -

(१) दिपकभाई प्रह्लादभाई शुक्लः
(२) राजेश हिम्मतलाल जोशी
(३) परेश सुरेशभाई पण्ड्या
(४) किशोरकुमार वालजीभाई शेलडिया
(५) योगेशकुमार दिलसुखराय पण्ड्या
(६) महेशकुमार हसमुखराय ठाकरः
(७) अश्विनभाई कान्तिलाल राजगोरः
(८) फाल्गुनभाई महेन्द्रभाई मोढा
(९) भरतकुमार केशवलाल वालाणी
(१०) राजेन्द्रकुमार जयशङ्करभाई पण्ड्या
(११) रुद्रेश रजनीकान्तभाई भट्टः
(१२) साधु आदर्शजीवनदास गुरुप्रमुखस्वामिमहाराजः
(१३) जानकीशरणः
(१४) संजयकुमार शान्तिलाल जोशी
(१५) देवेन्द्रकुमार नवनीतलाल जोशी
(१६) नर्मदाशङ्कर गिरजाशङ्कर राजगोरः
(१७) स्वामी योगेश्वरदासः गुरुस्वामी नित्यस्वरूपदासः
(१८) ना. वैथी सुब्रमण्यम्



अष्टमवार्षिकपदवीदानसमारम्भे एवं अन्ताराष्ट्रियसंगोष्ठ्याः उद्घाटने उपस्थिताः महानुभावाः

**पदवीं लभमानानाम् अन्येषां छात्राणां विवरणम्**

| क्रमः | कक्षानाम | सङ्ख्या |
|---|---|---|
| 1. | शास्त्री-३ (T.Y.B.A.) | २८८ |
| 2. | आचार्य-२ (M.A.-2) | १३४ |
| 3. | शिक्षाशास्त्री (B.Ed.) | ८७ |
| 4. | P.G.D.C.A. | ८५५ |
| 5. | तत्त्वाचार्यः (M.Phil.) | ०८ |
| 6. | विद्यावारिधिः (Ph.D.) | १८ |
| | आहत्य | १३९० |

७-२-२०१६ तः ९-२-२०१६ दिनाङ्कं यावत् दिनत्रयव्यापिन्यामस्यां संस्कृतसङ्गोष्ठ्यां ४२९ प्रतिभागिनः उपस्थाय स्वकीयं शोधपत्रं पठितवन्तः । ९-२-२०१६ तमे दिनाङ्के मङ्गलवासरे अपराह्णे २-३० वादने अन्ताराष्ट्रिय-संस्कृतसङ्गोष्ठ्याः सम्पूर्तिसमारोहोऽभवत् । कार्यक्रमेऽस्मिन् अध्यक्षत्वम् ऊढवन्तः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. अर्कनाथ-चौधरीमहोदयाः । सम्मान्याः मुख्यातिथयः आसन् पद्मश्री महामहोपाध्यायाः डाह्याभाईपश्चोलीमहोदयाः । विशेषातिथिरूपेण वेरावल-पाटणसंयुक्तनगरपालिकायाः प्रमुखाः श्रीजगदीशफोफंडी-महोदयाः समुपस्थिताः आसन् । वाराणसीतः समागताः प्रो.कमलेशदत्तत्रिपाठीवर्याः विशिष्टातिथिपदमलङ्कृतवन्तः । लब्धकीर्तयः विश्रुताः कविवराः प्रो.अभिराजराजेन्द्रमिश्रवर्याः सारस्वतातिथिपदम् अलङ्कृत्य सारस्वतप्रवचनम् अकुर्वन् । डॉ. दशरथजादवमहोदयाः कार्यक्रमान्ते आभाराभिव्यञ्जनं कृतवन्तः।




संस्कृतकविसम्मेलने उपस्थिताः मञ्चस्थाः कवयः

## संस्कृतकविसम्मेलनम्

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठ्याः अङ्गतया श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलम् तथा गुजरात- साहित्य- अकादमी- गान्धीनगरम् इत्यनयोः संयुक्तोपक्रमेण स्वस्तिश्रीविक्रमाब्द २०७२ पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे सायं संस्कृतकविसम्मेलनं समायोजितमासीत् । सन्दर्भेऽस्मिन् लब्धप्रतिष्ठिताः संस्कृतविद्वांसः कवयश्च स्वरचितकाव्यप्रस्तुत्या संस्कृतज्ञानां चित्तप्रसादनं रसास्वादं च कारितवन्तः । तत्र निमन्त्रिताः कवयः इत्थम् आसन् - प्रो.रामकरणशर्म, प्रो.कमलेशदत्तत्रिपाठी, प्रो.अम्बालालप्रजापति, प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. मिथिलाप्रसादत्रिपाठी, प्रो.रामलखनपाण्डेयः, प्रो. हर्षदेवमाधवः, डॉ. जयप्रकाशनारायणद्विवेदी, डॉ. नरेन्द्रकुमारपण्ड्या, डॉ. शिवजीउपाध्यायः, डॉ. अमृतलालभोगायता, डॉ. उमाकान्तचतुर्वेदी, प्रो.रामकुमारशर्म, डॉ. उमारमणझा, प्रो.रमेशकुमारपाण्डेयः, डॉ. शङ्करजीझा, प्रो. देवेन्द्रनाथपाण्डेयः, प्रो.उमाशङ्करशर्म, डॉ. बलदेवानन्दसागरः, श्री भाग्येशझा, प्रो.राजेन्द्रनाणावटी, प्रो.रामसुमेरयादवः च । अस्य कार्यक्रमस्य सञ्चालनं डॉ. नरेन्द्रकुमारपण्डयामहोदयाः कृतवन्तः । अध्यक्षत्वं च ऊढवन्तः श्रीभाग्येशझामहोदयाः । समग्रस्यास्य कार्यक्रमस्य संयोजनं संकलनं च कृतवन्तः प्रो. हर्षदेवमाधवमहोदयाः ।

## सांस्कृतिककार्यक्रमः

अन्ताराष्ट्रियसंस्कृतसङ्गोष्ठयाः अङ्गतयैव विशेषाकर्षणरूपेण सांस्कृतिककार्यक्रमः विश्वविद्यालयेन ८-२-२०१६ तमे दिनाङ्के समायोजितः आसीत् । कार्यक्रमेऽस्मिन् भावाश्रितानि रसाश्रितानि नृत्यानि विशेषप्रयोगपूर्वकाणि नाटकानि च अभवन् । पुनश्च गुर्जरसंस्कृतमिश्रभावाश्रितं यत्सञ्चालनं अध्यापकाः अकुर्वन् तत्तु सर्वाधिकाद्भुतमेव । मान्याः कुलपतिवर्याः अस्य कार्यक्रमस्य सफलतायै ये अध्यापकाः ये च छात्राः प्रयत्नं कृतवन्तः तान् पुरस्कारादिभिः आशीर्वचोभिश्च सम्मानितवन्तः । कार्यक्रमस्यास्य संयोजनं कृतवन्तः डॉ. दीपेशकतिरा, डॉ. ललितपटेलः, डॉ. अमृतलालभोगायता च ।





सांस्कृतिककार्यक्रमाः



सांस्कृतिककार्यक्रमेषु भागम् ऊढवतां चित्रम्

## सोल्लासं समाचरितः वार्षिकोत्सवः




वार्षिकोत्सवे समुपस्थिताः वामतः प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रकुमारपण्डया, प्रो. अर्कनाथचौधरी, डॉ. दशरथजादवः, श्रीयोगेशपटेलः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्रथमः वार्षिकोत्सवः ०२/०४/२०१६ तमे दिनाङ्के समाचरितः । सायं सप्तवादनतः आरब्धेऽस्मिन् वार्षिकोत्सवे बहवः सांस्कृतिककार्यक्रमाः छात्रैः प्रस्तुताः। माननीयकुलपतिः श्रीअर्कनाथचौधरी, कुलसचिवः श्रीदशरथजादवः, परीक्षाधिकारी श्रीयोगेशपटेलः, अनुस्नातकविभागाध्यक्षः प्रो. देवेन्द्रनाथपाण्डेयः, प्राचार्यः डॉ. नरेन्द्रपण्ड्यामहोदयः इत्यादिमहानुभावाः विशेषरूपेण उपस्थिताः आसन् । सर्वेऽपि अध्यापकाः, शिक्षणेतरकर्मचारिणः अधिकारिणश्च अत्र सपरिवारं उपस्थिताः आसन् । छात्रैः संवादात्मकाभिनवपद्धत्या सञ्चालितस्य कार्यक्रमस्यास्य आरम्भः वैदिक्या प्रार्थनया अभवत्। तदनु दर्शनसङ्कास्य डॉ. जानकीशरणेन, उमामहेश्वर्या च विश्वविद्यालयविषये स्वानुभवः आविष्कृतः । आचार्यद्वितीयवर्षीयच्छात्रस्य सञ्जयस्य गीतेन सर्वे आनन्दिताः अभवन् । रुबिनासाहू, आकाशपुरोहितः, मयूरजानी, जोषीभाविकः, अरुणपाण्डेयः, प्रकाशमिश्रः, परमेशमिश्रः, आकाशपुरोहितः, जोषी मेहुलः, भावेशबामणिया इत्यादिच्छात्रैः सङ्गीतनाटकादीनां प्रस्तुतिः कृता । माननीयकुलपतिना प्रो. अर्कनाथचौधरीमहोदयेन स्वीये उद्बोधने उक्तं यत् कस्यापि विश्वविद्यालयस्य वार्षिकोत्सवः तत्रत्यानां छात्राणां प्रातिभसमारोहः भवति। यस्मिन् छात्राः शिक्षणेतरगतिविधीन् प्रदर्शयन्ति। सर्वेषु च्छात्रेषु काचिद् विशिष्टा प्रतिभा भवति, या एतादृशैः कार्यक्रमैः प्रकटिता भवति। एतादृशेन कार्यक्रमेण छात्राः विविधान् अनुभवान् समवाप्य राष्ट्रस्तरे स्वप्रातिभप्रदर्शने सामर्थ्यमवाप्नुवन्ति । माननीयकुलसचिवेनापि अमुं कार्यक्रमं दृष्ट्वा "अभिनवोऽयं कार्यक्रमः" इति स्वमनोभावः प्रकटितः । कुलसचिवेन एदर्थमपि छात्राणां प्रशंसा कृता यत् विश्वविद्यालयस्य अयं प्रथमः कार्यक्रमः यः छात्रैः प्रस्तावितः, संरचितः, सञ्चालितश्च । तदनु प्रो. देवेन्द्रनाथपाण्डेयः, डॉ. नरेन्द्रपण्ड्या च छात्रान् अबोधयताम् । कार्यक्रमान्ते वाग्वर्धिनीपरिषदि सर्वाधिकतया भाषणकर्तृभ्यः अरुणपाण्डेयः, परमेशमिश्रः, राहुलकुमारझा, प्रकाशरञ्जनमिश्रः, शियाणी जयेशः इति पञ्चभ्यः छात्रेभ्यः "वाग्भूषणपुरस्कारः" महानुभावैः प्रदत्तः । अपि च अस्मिन् शैक्षिकवर्षे यैः छात्रैः विभिन्नस्थलेषु प्रतियोगितासु पुरस्काराः प्राप्ताः, तेषामपि महानुभावैः सम्माननं कृतम् । समग्रस्यापि कार्यक्रमस्य सञ्चालनं राहुलझा, गामितकरिश्मा च अकुरुताम्। कार्यक्रमान्ते चन्द्रमौलिबालकच्छात्रावासे सर्वैः सग्धिः कृता।

## University in News


वेरावळ : सोमनाथ संस्कृत युनि.मां समूह योग कार्यक्रम योजायो

વેદથી વેબ સહિતના ૩૫૬ ટેબ્લો પ્રજાસત્તાકપર્વની પરેડમાં રજૂ થશે

વેરાવળ ખાતે સોમનાથ સંસ્કૃત યુનિ. નો આઠમો પદવીદાન સમારોહ રાજ્યપાલ ઓ.પી.કોહલીના અધ્યક્ષસ્થાને સંપન્ન

રાષ્ટ્રની એકતા માટે સંસ્કૃત જરૂરી : રાજયપાલ

વેરાવળ: સોમનાથ સંસ્કૃત યુનિ. દ્વારા આયોજિત ત્રિદિવસીય આંતરરાષ્ટ્રીય સંગોષ્ઠી કાર્યક્રમ સંપન્ન

સોમનાથ સંસ્કૃત યુનિ.માં આંતરરાષ્ટ્રીય સંસ્કૃત સંગોષ્ઠિ અને સંસ્કૃત કવિ સંમેલન

સોમનાથ સંસ્કૃત યુનિવર્સિટીમાં મંગલ મંત્રોચ્ચાર, યોગ નિદર્શન

गुजरातवेरावलअन्ताराष्ट्रिय संस्कृतसम्मेलनं सम्पन्नम्

वेरावळ खाते सोमनाथ संस्कृत युनि. नो आठमो पदवीदान समारोह राज्यपालश्री ओ.पी.कोहलीना अध्यक्षस्थाने संपन्न

## राज्यस्तरीयः प्रजासत्ताकदिवसान्तर्गतः योगकार्यक्रमः




६७ तमस्य प्रजासत्ताकदिवसस्य राज्यस्तरीय-कार्यक्रममान्तार्गते विश्वविद्यालयपरिसरे सामूहिकयोगप्रदर्शनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलद्वारा राज्यस्तरीयप्रजासत्ताकदिवसान्तर्गत- 'योगदिवस' इति कार्यक्रमः २०/०१/२०१६ तमे दिनाङ्के समाचरितः। विश्वविद्यालयस्यान्तेवासिनः, वेरावलस्थ-विविधविद्यालयेभ्यः समागताः विद्यार्थिनः, वेरावलस्थाः पौराश्च कार्यक्रमेऽस्मिन् विश्वयोगदिवसं निमित्तीकृत्य सर्वकारयोजनानुसारं नियतयोगासनप्राणायामसूर्यनमस्कारान् कृतवन्तः । गीरसोमनाथजनपदसमाहर्ता डॉ. अजयकुमारः, वेरावलपाटणनगरपालिकाप्रमुखः श्रीजगदीशभाईफोफंडी, अन्येऽधिकारिणश्च कार्यक्रमेऽस्मिन् उपस्थाय भागं गृहीतवन्तः। विशेषरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यार्थिन्यः अस्मिन् कार्यक्रमे योगप्रदर्शनमकुर्वन् । डॉ. ललितकुमारपटेलः तथा श्रीजयेशमुंगरा मञ्चसञ्चालनं कृतवन्तौ । कार्यकारिकुलसचिवः डॉ. दशरथजादवः कार्यक्रमस्यास्य संयोजनमकरोत् । १८०० जनाः संभूय योगं कृतवन्तः कार्यक्रमेऽस्मिन्।

अस्यैव कार्यक्रमस्य अङ्गतया वेरावलनगरस्य विविधेषु क्षेत्रेषु निःशुल्कयोगप्रशिक्षणवर्गाः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १६ तः १९ दिनाङ्कं यावत् आयोजिताः। २६/०१/२०१६ तमे दिनाङ्के ६७ तमस्य प्रजासत्ताकदिवसस्य राज्यस्तरीयः कार्यक्रमः सोमनाथे सम्पन्नः । तत्र विश्वविद्यालयस्य पक्षतः सामूहिकयोगप्रदर्शनं, विश्वविद्यालयचलप्रदर्शनं चाभवत्। तत्र महाऽऽर्तिक्येऽपि विश्वविद्यालस्य अध्यापकाः छात्राश्च भागं गृहीतवन्तः। सामुहिकयोगप्रदर्शने डॉ. जयेशमुंगरामहोदयः संयोजकरूपेण कार्यम् अवहत्।



विश्वविद्यालयपक्षतः योगदिवसस्य आचरणम्

## महर्षिवेदव्यासप्रतिमायाः अनावरणकार्यक्रमः



११-०१-२०१६ तमे दिनाङ्के विश्वविद्यालयपरिसरे महर्षिकृष्णद्वैपायन-वेदव्यासप्रतिमाप्रतिष्ठापनस्यान्यतमः कार्यक्रमः सम्पन्नः । पराशरनन्दनः महा-भारताख्यज्ञानप्रदीपप्रज्वालकः अष्टादश-पुराण-कारः वेदान्तसूत्रप्रवर्तको भगवान् बादरायणः वेदव्यासः मूर्तिरूपेण प्रतिष्ठापितः विश्वविद्यालयेन । गुजरातराज्यस्य राज्यशिक्षामन्त्रि-महोदयानां प्रो.वसुबेनत्रिवेदीनां करकमलाभ्यां राज्यकृषिमन्त्रिणां श्रीजशाभाईबारडमहोदयानां, वेरावलप्रभासपाटणसंयुक्तनगर-पालिकायाः प्रमुखानां श्रीजगदीशभाईफोफंडीमहोदयानां,



महर्षिवेदव्यासप्रतिमायाः अनावरणं कुर्वन् राज्यशिक्षामण्त्रियः प्रो. वसुबेनत्रिवेदीमहोदयाः

कुलपतिमहोदयानां प्रो.अर्कनाथचौधरीमहोदयानां, कुलसचिववर्याणां डॉ. दशरथजादवमहोदयानां, नगरश्रेष्ठानां च समुपस्थितौ वेदव्यासमूर्तेः अनावरणकार्यक्रमोऽयं समपद्यत। कार्यक्रमस्याङ्गतया 'प्रभासज्योतिः' इत्याख्यभवने सभाखण्डे समुपस्थिताः महानुभावाः स्वीयवचोभिः उपकृतवन्तः, मार्गदर्शनं चाकुर्वन्। डॉ. ललितपटेलः अस्य कार्यक्रमस्य मञ्चसञ्चालनमकरोत् । प्रसङ्गेऽस्मिन् डॉ. अमृतलालभोगायता अमुं काव्यविशेषं रचितवान्-

सङ्कोचं न गतं सुचारुरसितं गाङ्गेयमम्भो यथा
माधुर्याक्षयभाजनं विरचितं व्यासेन व्यासोपमम्।
व्याप्तं वित्तिवदान्यवन्द्यविषयासारं ससारं सरः
सेव्यं सारवतां पुराणललितं भोगायताक्षं सुमम्॥ इति॥

## आचार्यसम्मेलनम्

३०/०१/२०१६ तमे अपराह्ले त्रिवादने उत्तरगुजरातस्य उपपञ्चाशत् विद्यालयीयाः आचार्याः श्रीमतः गिरीशभाईठाकर-महोदस्य नेतृत्वे श्रीसोमनाथसंस्कृतविश्वविद्यालयं समागताः। कुलपतयः प्रो.अर्कनाथचौधरीमहोदयाः तथा कुलसचिवाः डॉ. दशरथजादवमहोदयाः सभायां तैः सह चर्चां कृत्वा मार्गदर्शनम् अकुर्वन्। अस्य सभाकार्यक्रमस्य मञ्चसञ्चालनं डॉ. दीपेशकतिरा अकरोत्।

## छात्रोपलब्धिः



राष्ट्रियसंस्कृतसंस्थानं, नवदेहलीद्वारा ०२/०३/२०१६ दिनाङ्कतः १८/०३/२०१६ दिनाङ्कपर्यन्तम् एकलव्यपरिसरे (अगरतला-त्रिपुराराज्ये) शास्त्रार्थप्रशिक्षणवर्गः समायोजितः। तत्र साहित्यविषये शास्त्रार्थप्रशिक्षणार्थं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य छात्रः जिगरभट्टः संस्थानद्वारा चितः। सः तत्र साहित्यशास्त्रार्थप्रशिक्षणं प्राप्य लिखितपरीक्षायां वाक्परीक्षायां च प्रथमश्रेणीमवाप्नोत्। समारोपसमारोहे त्रिपुराराज्यस्य महामहिमराज्यपालानां करकमलाभ्यां तेन प्रमाणपत्रं प्राप्तम्।



बामरोटिया अस्मिता नाम्नी छात्रा सोमनाथे समायोजिते राज्यस्तरीय- प्रजासत्ताकदिवसे २६/०१/२०१६ तमे दिनाङ्के योगविषयक विशेषोपलब्ध्यर्थं माननीयानां मुख्यमन्त्रिणां श्रीमती-आनन्दीबेनमहोदयानां करकमलाभ्यां सम्मानिताऽभवत्।

## गान्धिनिर्वाणदिनम्

३०/०१/२०१६ तमे प्रातः एकादशवादने कुलपतीनां प्रो.अर्कनाथ-चौधरीमहोदयानां समुपस्थितौ हुतात्मदिवसं गान्धिनिर्वाणदिनं च निमित्तीकृत्य देशवीरेभ्यः श्रद्धाजलिं प्रदत्तवन्तः विश्वविद्यालयस्य सर्वे अध्यापकाः छात्राश्च।

## वाग्वर्धिनीपरिषत्-२०१५-१६



श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रतिगुरुवारसरं छात्राणां वाक्कौशलवर्धनाय शास्त्रज्ञानवर्धनाय च वाग्वर्धिनीपरिषदः आयोजनं क्रियते। अस्यां सभायां छात्रा स्वस्वशास्त्रेषु संस्कृतमाध्यमेन भाषणं कुर्वन्ति। अध्यापकाः अपि सभायामस्यां समुपस्थाय छात्राणाम् उत्साहवर्धनं कुर्वन्ति। सर्वासु सभासु सर्वाधिकरूपेण भाषणकर्तॄणां छात्राणां कृते वाग्वर्धिनीपरिषत्समारोपसमारोहे पुरस्काराः प्रदीयन्ते। अस्मिन् हायनेऽपि वार्षिकोत्सवे सर्वाधिकरूपेण भाषणकर्तारः छात्राः माननीयकुलपतिना श्रीअर्कनाथचौधरीमहोदयेन, कुलसचिवेन श्रीदशरथजादवमहोदयेन च पुरस्कारैः सभाजिताः आसन्। २०१५-१६ तमे शैक्षिकवर्षे अस्याः परिषदः अध्यक्षः डॉ. रमेशचन्द्रशुक्लः तथा सभ्यौ डॉ. जानकीशरणः, श्रीउमाशङ्करझा च सफलतापूर्वकम् अस्याः सभायाः सञ्चालनम् अकुर्वन्।

## श्रीप्रमुखस्वामिमहाराजद्वारशिलान्यासः




विश्वविद्यालयस्य मुख्यद्वारस्य शिलान्यासः

स्वस्तिश्रीविक्रमाब्द-२०७२ पौषकृष्णचतुर्दश्यां ७-२-२०१६ तमे दिनाङ्के रविवासरे माननीयानां कुलाधिपतीनां गुजरातराज्यस्य राज्यपालमहोदयानां प्रो. ओमप्रकाशकोहली-महोदयानां करकमलाभ्यां, गुजरातराज्यस्य शिक्षामन्त्रिणां श्रीभूपेन्द्रसिंहचुडासमामहोदयानाम्, गुजरातराज्यस्य राज्य-कक्षाकृषि-नागरिक-उड्डयनमन्त्रिणां श्रीजशाभाईबारड-महोदयानाम्, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयानां कुलपतीनां प्रो. अर्कनाथचौधरीमहोदयानाम्, संस्कृतविदुषां च समुपस्थितौ तथा डॉ. श्रुति-प्रकाशदासस्वामिपादानाम् आशीर्वचोभिः श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य श्रीप्रमुखस्वामिमहाराजद्वारशिलान्यासः सुचारुरूपेण सम्पन्नः। विश्वविद्यालयस्य भव्यप्रवेशद्वारमिदं BAPS इति संस्थया निर्मीयते।



मुख्यद्वारस्य शिलान्यासावसरे मान्यवरैः देवार्चनम्

## मातृभाषादिवसः

२०/०२/२०१६ तमे दिनाङ्के मातृभाषादिवसं लक्ष्यीकृत्य श्रीसोमनाथसंस्कृतविश्वविद्यालयेन व्याख्यानद्वयस्य आयोजनं कृतम्। मातृभाषाविषये डॉ. ललितपटेलः तथा डॉ. अमृतलालभोगायता विशिष्टशैल्या स्वकीयविचारान् प्रकटीकृतवन्तौ।

## वाक्यार्थपरिषद्- २०१६

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रतिवर्षं स्वोत्कर्षाय शास्त्रसेवायै छात्रलाभाय च विविधेषु विषयेषु शास्त्रावगाहनं कर्तुं प्राध्यापकेभ्य: वाक्यार्थपरिषदाख्यः कार्यक्रमः प्रवर्त्यते । २०१५-२०१६ इत्यस्मिन् वर्षे डॉ. पङ्कजकुमार रावल:, डॉ. शत्रुघ्नपाणिग्राही अनयो: संयोजने अयं प्रकल्प: समनुष्ठित: । अस्यां परिषदि प्राध्यापका: अध्यापनबिन्दून् अभ्यासक्रमं विहाय वा सर्वोपकारकं विषयं विचिन्वन्ति । तेन बहूनां शास्त्राणां विषयाणां संस्पर्श: भवति । विश्वविद्यालयेनानेन सत्रारम्भे कुलपतिवर्याणां प्रो. अर्कनाथचौधरिमहोदयानां व्याकरणविषयावगाहनरतानां वाक्यार्थपरिषदि लाभ: गृहीत: । ततश्च क्रमेण सर्वैरपि प्राध्यापकैः व्याख्यानं कृतम् । अत्र सूची प्रदीयते ।

**प्रथमाधिवेशनम् - १७-१०-२०१५**

अध्यक्षः - प्रो. अर्कनाथचौधरीमहाभागा - विध्यादय अर्था: द्योत्या: वाच्या: वा

मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही

**द्वितीयाधिवेशनम् - १८-०१-२०१६**

अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या

मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही

१. प्रो. देवेन्द्रनाथपाण्डेयः - वैदिकदेवशास्त्रम्

२. डॉ. दीपेशकतिरा - भावविकारविमर्श:

३. डॉ. जानकीशरण: - भारतीयदर्शनेषु पाठसमालोचनपद्धति:

**तृतीयाधिवेशनम् - १६-०२-२०१६**

अध्यक्षः - प्रो. देवेन्द्रनाथपाण्डेयः

मञ्चसञ्चालकः - डॉ. पङ्कजरावलः

१. प्रो. विनोदकुमारझा - नधातुलोपअर्धधातुके"इतिसूत्रार्थविचार:

२. डॉ.डायाभाई मोकरीया - संस्कृतसाहित्ये पित्रो: गौरवम्

३. डॉ. अमृतलाल: भोगायता - अनन्योक्तेरन्योक्तेरीषदास्वाद:

**चतुर्थाधिवेशनम् - २१-०३-२०१६**

अध्यक्षः - प्रो. विनोदकुमारझा

मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही

१. डॉ. महेन्द्रकुमार: ए. दवे - रम्या रामायणी कथा

२. डॉ.ललित: पटेल: - ध्वनि:, ध्वनिप्रपञ्च:, तत्प्रयोजनञ्च

३. बी. उमामाहेश्वरी - व्याप्तिस्वरूपविचार:

**पञ्चमाधिवेशनम् - ०१-०४-२०१६**

अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या

मञ्चसञ्चालकः - डॉ. पङ्कजरावलः

१. डॉ. शत्रुघ्नपाणिग्राही - मन्त्रार्थविचार:

२. डॉ.रमेशचन्द्रशुक्ल: - ज्योतिषशास्त्रे नवविधकालमानविचार:

३. डॉ. कार्तिक: पण्ड्या - डॉ.गोस्वामीबलभद्रप्रसदशास्त्रीकृत 'इन्दिराजीवनम्' शतक काव्य का काव्यशास्त्रीय अध्ययन

**षष्ठाधिवेशनम् - ०५-०४-२०१६**

अध्यक्षः - डॉ. नरेन्द्रकुमारपण्ड्या

मञ्चसञ्चालकः - डॉ. शत्रुघ्नपाणिग्राही

१. डॉ. नरेन्द्रकुमारपण्ड्या - काव्यदोषविमर्श:

२ डॉ.पङ्कजकुमाररावल: - पाठ्यन्ते पशुभिर्नरा:

३. रविन्द्र:एस्.काले - Copyrights in India : An Introduction

४. उमाशङ्करः झा - ग्रहाणां गतिविचार:

## प्रश्नपत्रनिर्माणविषयकं विशिष्टं व्याख्यानम्




विशिष्टव्याख्याने मञ्चस्थाः (वामतः) डॉ. दशरथजादवः, डॉ. सरिताशास्त्री, डॉ. चमूकृष्णशास्त्री, प्रो. पी. एन्. शास्त्री, प्रो. अर्कनाथचौधरी

३०/ ०४/ २०१६ तमे दिनाङ्के डॉ. सरिताशास्त्रिमहोदया: देहलीतः समुपस्थाय 'प्रश्नपत्रनिर्माणविषयकं विशिष्टं व्याख्यानम्' अकुर्वन् । नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य कुलपतयः प्रो. पी. एन्. शास्त्रिवर्याः अपि कार्यक्रमेऽस्मिन् मार्गदर्शनं कृतवन्तः । प्रो.अर्कनाथचौधरीमहोदयाः अपि अध्यक्षत्वेन समुपस्थाय स्ववचोभिः सर्वान् अध्यापकान् उपदिष्टवन्तः । श्रीसोमनाथसंस्कृतविश्वविद्यालय-संलग्नमहाविद्यालयेभ्यः समागताः उपपञ्चाशत् अध्यापकाः कार्यक्रमेऽस्मिन् भागं गृहीतवन्तः । डॉ. ललितपटेलः अस्य कार्यक्रमस्य सञ्चालनम् अकरोत् ।



प्रश्नपत्रनिर्माणविषयकविशिष्टव्याख्यानकार्यक्रमः

## प्राकृतिक-आपत्तिनिवारणोपायविषयकः कार्यक्रमः

१९/०२/२०१६ तमे दिनाङ्के शुक्रवासरे श्रीसोमनाथ-संस्कृतविश्वविद्यालये गान्धिनगरस्थषष्ठसैन्यदलस्यापत्ति-सैन्यद्वारा (6th National Disaster Response Force) आपत्तिनिवारणाय विविधोपायानां प्रदर्शनम् अभवत् ।

## Academic Calendar 2016-2017 of SSSU, Veraval

| | |
|---|---|
| 10-06-2016 | Last date for applying in B.Ed. Course |
| 15-06-2016 to 25-10-2016 | 1st Semester Beginning (102 working days) for Colleges/Mahavidyalays/P.G. Section/Ceters |
| 2nd week of July, 2016 | Examination of Diploma/Certificate Courses |
| 04-06-2016 | Last date for submission of affifiation fees (for Mahavidyalayas/Colleges) |
| 02-07-2016 | Last date for admission in various courses (without late fees) |
| 15-07-2016 | Last date for admission in various courses (with Late fees) |
| 15-06-2016 to 15-07-2016 | Dates for admission in Diploma/Certificate Courses |
| 12-08-2016 to 18-08-2016 | Sanskrit Week Celebration |
| During Sanskrit week | University Lecture Series by Distinguished Sanskrit Scholars (**व्याकरण/साहित्य**) |
| 01-09-2016 to 30-09-2016 | Dates for submission of Examination Forms of Shastri & Acharya Courses (External) |
| 2nd week of September, 2016 | Meeting of Examination Board ( (**परीक्षा समिति**) |
| October, 2016 | Internal Assessment (Mahavidyalayas/Colleges/P.G. Section) |
| October, 2016 | Submission of Enrolment Forms of 1st Sem. (Regular) (Mahavidyalayas/ Colleges/P.G. Section) |
| 22-10-2016 to 24-10-2016 | University Youth Festival |
| 26-10-2016 to 15-11-2016 | Diwali Vacation for Mahavidyalayas/Colleges/P.G. Section/Centers (Total 21 days) |
| 16-11-2016 to 26-04-2017 | Second Semester Beginning for Mahavidyalayas/Colleges (Total 109 working days) |
| 16-11-2016 to 07-05-2017 | Second Semester Beginning for P.G. Section/Centers (Total 123 working days) |
| 3rd week of November, 2016 | Beginning of First Semester End Examination |
| 1st week of December, 2016 | Faculty Workshop (**शास्त्रपुनश्चर्या**) |
| 3rd week of December, 2016 | Shastriya Vyakhyanamala ((**शास्त्रीय व्याख्यानमाला**) |
| January, 2016 | 9th Convocation & National Seminar |
| February, 2016 | Dates for submission of 2nd Semester Examination Forms of Shastri/Acharya Courses (External) |
| 2nd week of February, 2016 | Meeting of Examination Board (**परीक्षा समिति**) |
| Last week of February, 2016 | Last dates for submission of Sem. Exam Forms (Regular) Mahavidyalayas/Colleges/P.G. Section. |
| March, 2016 | Internal Assessment |
| 01-04-2017 | University Establishment Day & Annual Day Celebration |
| April, 2016 | Last dates for submission of Int. Assessment Marks (2nd sem) Mahavidyalays/Colleges/P.G. Section |
| 1st/2nd week of April, 2016 | Second Semester End Examination |
| 27-04-2017 to 14-06-2017 | Summer Vacation for Mahavidyalayas/Colleges (Total 49 days) |
| 08-05-2017 to 14-06-2017 | Summer Vacation for P.G. Section/Centers (Total 39 days) |
| 15-06-2017 | Beginning of Academic Year 2017-2018 |

## INDIVIDUAL ACHIEVEMENTS - Dr. Kartik Pandya (Research Officer)

- Participated and presented a research paper entitled as "The Concept of Psychology in भीष्मचरितम् of Dr. Hari Narayan Dikshit" in Two-Day National Seminar jointly organised by Shree Somnath Trust, Prabhas Patan & Smt. C.P. Choksi Arts College, Veraval at Lilavati Bhavan of Shree Somnath Trust, Prabhas Patan during 16th & 17th January, 2016.
- Participated and presented a research paper entitled as "शतककाव्यानि of Dr. Rabindra Kumar Panda - A Study" in One-Day National Seminar organised by Department of Sanskrit, H.K. Arts College, Ashram Road, Ahmedabad on 20th January, 2016.
- Participated and presented a research paper entitled as "ऋणविमुक्तिः of H V Nagaraja Rao - A Study" in UGC Sponsored Two-Day National Seminar organised by Department of Sanskrit, Pali & Prakrit, Faculty of Arts, The Maharaja Sayajirai University of Baroda, Vadodara during 28th & 29th January, 2016.
- Co-ordinator cum Contact Person of Three-Day International Seminar on "शिवतत्त्व in Sanskrit Literature" organised by Shree Somnath Sanskrit University, Veraval in the University campus during 7th & 9th February, 2016.
- Editor in the Twelfth Issue of the सोमज्योतिः - Shree Somnath Sanskrit University Newsletter that was published in March, 2016.
- Co-ordinator of University Publications under which two books entitled as "काव्यलक्षणम्" and "छन्दःशास्त्र से विकल्प गणित क विकास" have been published in May, 2016 and September, 2016 respectively.

# अध्यापकानामुपलब्धयः

### प्रो. देवेन्द्रनाथपाण्डेयः (आचार्यः)

- श्रीसोमनाथसंस्कृतयुनिवर्सिटी द्वारा आयोजितायाः अन्ताराष्ट्रिय-संगोष्ठ्याः संयोजकरूपेण कार्यं सम्पाद्य Image of Rudra इति पत्रवाचनं कृतं, एकस्य सत्रस्य अधयक्षताऽपि कृता।
- वेद-वेदाङ्ग-संकायद्वारा आयोजितायां पुनश्चर्याकार्यशालायां "वैदिकदेवशास्त्रमिति विषयमवलम्ब्य व्याख्यानं प्रस्तुतम्। वाक्यार्थ-परिषदः एकदा अध्यक्षताऽपि कृता।
- अनुस्नातकविभागस्य अध्यक्षता, वेदविभागस्य उपाध्यक्षता, छात्रावासस्य अध्यक्षता च कृता।

### डॉ. नरेन्द्रकुमारः एल्. पण्डया (प्राचार्यः)

- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायाम् अन्ताराष्ट्रिय-संस्कृतसंगोष्ठ्यां संयोजकत्वेन सत्राध्यक्षत्वेन च कार्यमकरोत्। तत्रैव शोधपत्रं प्रस्तुतम्। संगोष्ठ्यन्त-र्गतकविसम्मेलने काव्यप्रस्तुतिः तथा मञ्चसञ्चालनमकरोत्।
- चोक्सीकोलेज- वेरावलद्वारा आयोजितायां राष्ट्रियसङ्गोष्ठयां आमन्त्रितः सन् व्याख्यानं दत्तवान्। श्रीसोमनाथसंस्कृत-विश्वविद्यालयेन आयोजितायां साहित्यशास्त्रपुनश्चर्याकार्यशालायां काव्यप्रकाशमधीकृत्य व्याख्यानमदात्। वाक्यार्थपरिषदि व्याख्यानं दत्तवान्।
- विश्वयोगदिवसे नोडलओफिसररूपेण कार्यमकरोत्।

### प्रो. अर्चना दुबे (आचार्यः)

- ६-७ जनवरी २०१६ तमे दिनाङ्के आयोजितायां पी.जी.डी.सी.ए पाठ्यक्रमसंयोजकानां कार्यशालायां संयोजिकारूपेण कार्यं कृतम्।
- १६ मई २०१६ तमे दिनाङ्के रांचीविश्वविद्यालयस्य संस्कृतविभागेन आयोजितायां त्रिदिवसीयान्ताराष्ट्रियशोध-सङ्गोष्ठ्यां "शिल्पवैविध्यं-शास्त्रम् अनुप्रयोगश्च" इति विषये आमन्त्रितं व्याख्यानं प्रदत्तम्।
- संस्कृत-दिग्दर्शिका UGC/NET-2016 इति पुस्तकस्य प्रकाशनम्।

### डॉ. ललितकुमारः पटेलः (सहायकाचार्यः)

- ६-७ जनवरी २०१६ दिनाङ्कयोः विश्वविद्यालये 'अध्यापक-प्रशिक्षणकार्यशालायां' भागग्रहणम्।
- १७ जनवरी २०१६ तमे दिनाङ्के 'मनोविज्ञाने व्यवहारवादः' इत्यस्मिन् विषये वेरावले राष्ट्रियपरिसंवादे शोधपत्रप्रस्तुतिः।
- ७ तः ९ फरवरी २०१६ दिनाङ्कं यावत् श्रीसोमनाथसंस्कृत-विश्वविद्यालये प्रवर्तितायाम् अन्ताराष्ट्रियसंस्कृतसंगोष्ठ्यां शोधपत्रप्रस्तुतिः।
- ५ तः ७ मार्च २०१६ दिनाङ्केषु अखिलभारतीय हेमचन्द्रसमारोहे 'भारतीयप्रतिभातत्त्वचिन्तनपरिप्रेक्ष्ये वामनो राजशेखरो हेमचन्द्रश्च' इत्यस्मिन् विषये शोधपत्रप्रस्तुतिः।
- २९ फरवरी तः ०२ मार्च-२०१६ दिनाङ्केषु नटपुरे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यसङ्कायेन समा-योजितायां कार्यशालायां भागग्रहणं तथा तत्र द्वे व्याख्याने प्रदत्ते।
- २०/०२/२०१६ तमे दिनाङ्के बायसेग(BISAG) गान्धिनगरद्वारा के.सी.जी. सन्धानकार्यक्रमे व्याख्यानम्।
- २०/०२/२०१६ तमे दिनाङ्के मातृभाषादिवसं लक्ष्यीकृत्य श्रीसोमनाथसंस्कृतविश्वविद्यालये विशेषव्याख्यानम्।
- ०६/०४/२०१६ तमे दिनाङ्के भीडिया पे-सेन्टरविद्यालये दीक्षान्तसमारोहे मुख्यातिथिरूपेण समुपस्थाय प्रेरकं व्याख्यानं कृतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ७ तः ९ फरवरी-२०१६ दिनाङ्केषु समायोजितायाम् अन्ताराष्ट्रियसंस्कृत-संगोष्ठ्यां संयोजकत्वेन सुचारुतया दायित्वनिर्वहणमकरोत्।
- सोमज्योतिः' इति प्रातिभप्रकाशनस्य सम्पादकत्वेन योगदानम्।

### डॉ.रमेशचन्द्रशुक्लः (सहायकाचार्यः)

- 16-01-2016 तः 17-01-2016 पर्यन्तं वेरावलस्थसी.पी.चोक्सीआर्ट्सकोलेजद्वारा आयोजितायां राष्ट्रियसङ्गोष्ठ्यां शोधपत्रवाचनं कृतम्।
- श्रीसोमनाथसंस्कृतयुनिवेर्सिटीद्वारा समायोजितायां अन्ताराष्ट्रियसङ्गोष्ठ्यां "ज्योतिषशास्त्रे शिवतत्त्वविमर्शः" इति विषयमाधारीकृत्य शोधपत्रस्य वाचनम् एकस्य सत्रस्य सञ्चालनं च कृतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्ग-संकायद्वारा १९ तः २१ फरवरी २०१६ इत्यस्मिन् कालावधौ आयोजितायां शास्त्रपुनश्चर्या-कार्यशालायां बृह-त्पाराशरहोराशास्त्रान्तर्गतसृष्टिक्रमवर्णनाध्यायमवलम्ब्य व्याख्यानं कृतम्।
- श्रीसोमनाथसंस्कृतयुनिवेर्सिटीद्वारा समायोजेते NET/ SLET कक्षायां छात्राणां कृते अध्यापनकार्यम्।
- राष्ट्रियसेवायोजनायां (N.S.S) प्रोग्रामओफीसररूपेण कार्यं कृतम् तथा च १०-३-२०१६ तः १६-३-२०१६ पर्यन्तं तालालारमणेचीग्रामे विशेषशिबिरस्यायोजनं कृतम्।
- सप्तषष्ठितमप्रजासत्ताकपर्वणि राज्यमहोत्सवे २६-१-२०१६ दिनाङ्के योगकार्यक्रमे छात्राणां व्यवस्थापकरूपेण दायित्वं निरूढम्।

### शत्रुघ्नपाणिग्राही (सहायकाचार्यः)

- भारतीयचतुर्द्धामवेदभवनन्यासस्य पुरीपरिसरे २/०३/२०१६ तः ४/०३/१६ इत्यस्मिन्नवधौ आयोजिते त्रिदिवसीये अखिलभारतीयवैदिकसम्मेलने "शुक्लयजुर्वेदे पर्यावरणम्" इति विषये शोधपत्रवाचनं कृतम्।
- श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा समायोजिते अन्ताराष्ट्रियपरिसंवादे "रुद्रोपनिषदि शिवतत्त्वम्" इति विषयमाधारीकृत्य शोधपत्रस्य वाचनं कृतम्।
- शिवसंकल्पसूक्ते मनः स्वरूपम्' इति विषयमाधारीकृत्य श्री चोक्सी कालेजद्वारा आयोजिते राष्ट्रियपरिसंवादे पत्रवाचनं कृतम् (16-01-2016 तः 17-01-2016)
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसंकायद्वारा २०१६तमे वर्षे आयोजितायाः शास्त्रपुनश्चर्याकार्यशालायाः संयोजकरूपेण कार्यं कृतम्। अपि च तत्र निरुक्तस्य प्रथमाध्यायस्य पञ्चमपादमाश्रित्य व्याख्यानमपि कृतम्।
- 2015-2016 इति शैक्षिकवर्षे वाक्यार्थपरिषदः संयोजकरूपेण कार्यं कृतम्। तत्र ०१/०४/२०१६ तमे दिनाङ्के

"मन्त्रार्थविचारः" इति विषये व्याख्यानमपि कृतम्।

- दिवाकरद्युतिः' इति पुस्तकस्य सम्पादनकार्यं अस्मिन् वर्षे कृतम्।
- विश्वविद्यालय-अनुदान-आयोग्यस्य (U.G.C.) प्रकल्पान्तर्गतं मया कृतानि व्याख्यानानि अन्तर्जाले प्रसारितानि । संकेत: epgp.inflibnet.ac.in, M.A in Sanskrit, Language, Paper No. 8

**डॉ. जानकीशरणः (सहायकाचार्यः – वेदान्तविभागः)**

- जनवरी मासे १६-१७ तमे दिनाङ्के वेरावलस्थ 'चोक्सी कालेज' इत्यत्र आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'योगदर्शने मनोविज्ञानम्' विषये शोधपत्रं प्रस्तुतम्।
- २० तः २२ जनवरी, २०१६ पर्यन्तं BAPS स्वामिनारायण-संस्कृतमहाविद्यालये श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनसङ्कायेन आयोजितायां दर्शनशास्त्रविषय-कशास्त्रपुनश्चर्या-कार्यशालायाम् "अध्यासभाष्यं सूत्रार्थसंस्पर्शि" इति विषये व्याख्यानमदात्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अष्टमदीक्षान्तसमारोहे "कृष्णविरचितस्वोपज्ञप्रभाव्याख्यासहितायाः कैवल्यदीपिकायाः पाठसम्पादनं समीक्षात्मकमध्ययनञ्च" इति विषये विद्यावारिधिः (Ph.D.) इति उपाधिना सभाजितः।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ७ तः ९ फरवरी-२०१६ पर्यन्तम् आयोजितायाम् अन्ताराष्ट्रियसंस्कृतसंगोष्ठ्यां सत्रसञ्चालकत्वं विधाय "शाङ्करभाष्ये शैवदर्शनसमालोचनम्" इति विषये शोधपत्रमपठत्।
- २८ तः ३० मार्च, २०१६ पर्यन्तं देहली-संस्कृत-अकादम्याः आयोजिते अखिलभारतीयसंस्कृतसम्मेलने "मानवस्य अन्तःपर्यावरणम्" इति विषयमधिकृत व्याख्यानमकरोत्।
- सोमज्योतिः इति विश्वविद्यालयवार्तापत्रिकायाः सम्पादकत्वेन योगदानम्।
- २०१५-१६ तमे शैक्षिकवर्षे बालकच्छात्रावासस्य सह-अध्यक्षत्वेन कार्यं सम्पादितम्।

**उमाशङ्करझा (सहायकाचार्यः)**

- जनवरी मासे १६-१७ तमे दिनाङ्के वेरावलस्थ 'चोक्सी कालेज' इत्यत्र आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'जातकस्कन्धे मनः स्थितिविवेचना' विषये शोधपत्रं प्रस्तुतम्।
- ७-२-१६ तः ९-२-१६ श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजित-अन्ताराष्ट्रिय- संगोष्ठ्यां 'स्कन्धत्रये शिवतत्त्वानुशीलनम्' इति विषये शोधपत्रं प्रस्तुतम्।
- १३-३-१६ दिनाङ्के काशीहिन्दुविश्वविद्यालयद्वारा आयोजिते राष्ट्रियसम्मेलने "वास्तुशास्त्र का अनुशीलन" विषये शोधपत्रं 'Poster' द्वारा प्रस्तुतम्।
- २७-३-१६ तः २८-३-१६ यावत् काशीहिन्दुविश्व-विद्यालयद्वारा आयोजितायां राष्ट्रिय- सङ्गोष्ठ्यां 'ज्योतिषे स्वास्थ्यप्रदयोगाः' विषये शोधपत्रं प्रस्तुतम्।
- २८-३-१६ तः ३०-३-१६ यावत् दिल्ली-संस्कृत-अकादमी इत्यनया संस्थया आयोजिते त्रिदिवसीय-अखिलभारतीय-संस्कृतसम्मेलने 'ज्योतिषे सृष्टिविचारः' विषये शोधपत्रं प्रस्तुतम्।
- ६-४-१६ तः ७-४-१६ यावत् धर्म-संस्कृति-संगम-काशी चेत्येताभ्यां पालि-एवं-बौद्ध-विभाग सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः इत्यनयोः आयोजितायां अन्ताराष्ट्रिय- संगोष्ठ्यां 'आधुनिकसमाजे नारीणां स्थितिः' विषये शोधपत्रं `Poster' द्वारा प्रस्तुतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालये वाक्यार्थपरिषदः अधिवेशने 'ग्रहगतिविचारः' विषये शोधपत्रं प्रस्तुतम्।
- २१-२-१६ श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेद-वेदाङ्गसङ्कायस्य कार्यशालायां 'बृहत्पाराशरहोराशास्त्रे तृतीय-चतुर्थाध्योपरि' स्वव्याख्यानं प्रस्तुतम्।

**डॉ. जयेशः डी. मुंगरा (सहायकाचार्यः)**

- १९ जनवरी-२०१६ तमे दिनाङ्के चोक्सी आर्टस एवं कोमर्स-कोलेज-वेरावलद्वारा राष्ट्रियपरिसंवादे शोधपत्रस्य प्रस्तुतिः।
- ७ तः ९ फरवरी २०१६ दिनाङ्कं यावत् श्रीसोमनाथ-संस्कृतविश्वविद्यालये प्रवर्तितायाम् अन्ताराष्ट्रियसंस्कृत-संगोष्ठ्यां शोधपत्रप्रस्तुतिः।
- १२-१३ मार्च-२०१६ दिनाङ्कं यावत् हरिद्वारे आयोजितायाम् अन्ताराष्ट्रिययोगसंगोष्ठ्यां शोधपत्रप्रस्तुतिः।
- १५-१९ जनवरी २०१६ पर्यन्तं योगशिबिरस्य सञ्चालनम् अकरोत्।
- २०-०१-२०१६ तमे दिनाङ्के गुजरातसर्वकारेण आयोजितस्य 'योगदिवस' इति कार्यक्रमस्य सञ्चालनम् अकरोत् तथा २६-०१-२०१६ तमे दिनाङ्के गुजरातसर्वकारपक्षतः आयोजिते 'प्रजासत्ताकपर्वणि' इति ध्वजवन्दनकार्यक्रमाङ्गतया "योगासनप्रदर्शनम्" इति कार्यक्रमस्य सञ्चालनम् अकरोत्। ➢ २१-०६-२०१६ तमे दिनाङ्के द्वितीयविश्वयोगदिवसे योगकार्यक्रमस्य संयोजकत्वं विहितम्।
- द्वितीयविश्वयोगदिवसान्तर्गतं (१५-१९ जून २०१६) गीर-सोमनाथजनपदस्य शारीरिकशिक्षकेभ्यः योगप्रशिक्षणं प्रदत्तम्।

**डॉ.दिपेशविनोदकतिरा (सहायकाचार्यः)**

- अन्ताराष्ट्रियसंस्कृतसम्मेलने (७-९ फरवरी, २०१६) संस्कृतवाङ्मये शिवतत्त्वविमर्शः इत्यस्मिन् परिसंवादे "शाङ्करस्तोत्रेषु शिवतत्त्वम्" इति पत्रं प्रस्तुतम्।
- वाक्यार्थपरिषदि 'भावविकारविमर्शः' इति विषयमाश्रित्य सन्दर्शनं प्रस्तुतम्।
- जनवरीमासे राज्यसर्वकारद्वारा आयोजिते गुणोत्सवे परीक्षकत्वेन भागः ऊढः।

**बी. उमा महेश्वरी (सहायकाचार्या)**

- जनवरी मासे १६-१७ तमे दिनाङ्के वेरावलस्थ 'चोक्सी कालेज' इत्यत्र आयोजितायां राष्ट्रियसंगोष्ठ्यां 'आस्तिक-दर्शनान्तर्गतन्यानदर्शने मनोवैज्ञानिकविचारविमर्शः' विषये शोधपत्रं प्रस्तुतम्।
- जनवरी मासे संस्कार-भारती मानवकल्याणसंस्थानेन आयोजितायाम् अखिलभारतीयसंस्कृतसंगोष्ठ्यां "दार्शनिकदृष्ट्या गोतत्त्वम्"इति शोधपत्रं प्रस्तुतम्।
- श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते सम्मेलने "न्याय-वैशेषिकदर्शनयोः ईश्वरस्वरूपविचारः" इति विषये शोधपत्रं पठितम्।
- वाक्यार्थपरिषदि "व्याप्तिस्वरूपविचारः" इति विषये व्याख्यानं दत्तम्।

## दर्शनसङ्काय-शास्त्रपुनश्चर्याकार्यशाला



दर्शनपुराणसङ्कायकार्यशालयोः उपस्थिताः प्रतिभागिनः वक्तारश्च

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य दर्शनसङ्कायः पारम्परिकशास्त्राणां संरक्षणाय संवर्धनाय अभ्यासाय च २० तः २२ जनवरी २०१६ पर्यन्तं दर्शनसङ्कायस्य सर्वान् विषयान् केन्द्रीकृत्य दिवसत्रयव्यापिनीम् एकां कार्यशालां सारङ्गपुरस्थे B A P S स्वामिनारायणमन्दिरे आयोजितवान्। एतादृश्यां महत्त्वपूर्णकार्यशालायां विश्वविद्यालयसम्बद्धमहाविद्यालयेषु दर्शनसङ्कास्य रामानुजवेदान्त-स्वामिनारायणवेदान्त-नव्यन्याय-सर्वदर्शनम् इति विषयाणां विद्वांसोऽध्यापकाः शोधच्छात्राश्च भागमगृह्णन्।

कार्यशालायाः उद्घाटनं जनवरीमासस्य २० तमे दिनाङ्के प्रातः ९ वादने B A P S स्वामिनारायणमन्दिरस्य परिसरे दीपप्रज्वालनेन सह अभूत्। अस्मिन् उद्घाटनसमारोहेऽस्मिन् आर्ष-अक्षरधाम्नः निदेशकाः षड्दर्शनाचार्याः साधु-श्रुतिप्रकाशदासमहाराजाः मुख्यातिथिरूपेण आसन्। स्वामिनारायणवेदान्तप्रस्थानत्रयभाष्यकाराः साधुभद्रेशदासमहाराजाः, BAPS स्वामिनारायणसंस्कृतमहाविद्यालयस्य प्राचार्याः साधु-आत्मतृप्तदासमहाराजाः, दर्शनसङ्कायाध्यक्षाः डॉ. जानकीशरणमहोदयाः, पुराणसङ्कायाध्यक्षाः डॉ. अमृतलालभोगायतामहोदयाः, अन्ये च विद्वांसोऽध्यापकाः छात्राः नागराश्च उपस्थिताः आसन्। तत्रादौ डॉ. अमृतलालभोगायतामहोदयाः सर्वेषां महानुभावानां कृते उपस्थितानां छात्राणां कृते च स्वागतवचांसि प्राकटयन्। डॉ. जानकीशरणमहोदयाः अस्याः कार्यशालायाः प्रास्ताविकं स्वरूपञ्च प्रास्तुवन्।

पाश्चात्यभारतीयदर्शनयोः भेदं स्पष्टयन् मुख्यातिथिवर्यैः उक्तं यत् पाश्चात्यविदुषां दर्शनविषये कथनमस्ति 'Philosophy begins at wonder' अर्थात् दार्शनिकविचारधाराणामुत्पत्तिः आश्चर्येण सञ्जाता। कथमिदं स्यादित्येवाश्चर्यं दर्शनानामुत्पत्तौ मूलमिति। भारतीयदार्शनिकास्तु कथयन्ति 'दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ' इत्येवमीश्वरकृष्णः साङ्ख्यकारिकायां भारतीयदर्शनस्य समुत्पत्तिं प्रदर्शयति। अत्र खलु अस्माकं जीवनं केन हेतुना आत्यन्तिकदुःखरहितं भगवत्सुखयुक्तं निजानन्दरूपं वा स्यादित्येव जिज्ञासाया दर्शनविचारधारायाः प्रारम्भः। इदमेव भारतीयपाश्चात्यविचारधारयोः महदन्तरम्।



उद्घाटनसत्रे साधु-श्रुतिप्रकाशदासमहाराजाः

भारतीयदर्शनानि न केवलं शब्दज्ञान-पराणि, भारतीयदर्शनेषु न केवलं सम्प्रदायनिर्माणसाहित्यमथवा न स्वमनोनिहिता केवला कल्पना एव वर्तते, येन शब्दार्थसंयोजनेन तात्पर्यप्राप्तिः सम्भवेत्, किन्तु भारतीयदर्शनानां मूलानि वेदेषूपनिषत्सु च निहितानि। यत्र खलु शब्दार्थज्ञानान्मनोवैभवाच्च अधिकमपेक्षितमासीत्। अत एव गीतायां शब्दज्ञानम् अर्थज्ञानञ्च स्वीकृत्य ततोऽप्युत्कृष्टं विज्ञानमपि निदर्शितं 'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः' इति। दर्शनसङ्कायस्य अस्यां कार्यशालायां नव व्याख्यानानि सञ्जातानि। व्याख्यानानि इत्थं वर्तन्ते –

प्रथमसत्रं द्वितीयसत्रं च – साधुः भद्रेशदासः - तर्कसङ्ग्रहे अनुमानप्रकरणस्य पाङ्क्ताध्ययनम्। तृतीयसत्रम् – साधुः श्रुतिप्रकाशदासः - रामानुजस्वामिनारायणवेदान्तयोः साम्य-वैषम्यविमर्शः। चतुर्थसत्रम् - श्रीभगीरथत्रिवेदी- तर्कसङ्ग्रहे शब्दप्रकरणस्य पाङ्क्ताध्ययनम्। पञ्चमसत्रम् - डॉ. जानकीशरणः - सूत्रार्थसंस्पर्शि अध्यासभाष्यम्। षष्ठसत्रम् - साधुः भक्तिसागरदासः - जिज्ञासाधिकरणम्। सप्तमसत्रम् - साधुः श्रुतिप्रकाशदासः - स्वामिनारायणभाष्य-उत्पत्त्यधिकरणम्। अष्टमसत्रम् - डॉ. गजेन्द्रपण्डा - शाङ्करभाष्यजिज्ञासाधिकरणम्। नवमसत्रम् - साधुः आत्मतृप्तदासः - स्वामिनारायणभाष्य-जन्माद्यधिकरणम्।

दर्शनसङ्कायस्य शास्त्रपुनश्चर्याकार्यशालायाः समारोपसामारोहः जनवरीमासस्य २२ दिनाङ्के समभवत्। अत्र दर्शनसङ्कायाध्येण डॉ. जानकीशरणमहोदयेन कार्यशालायाः वृत्तं ज्ञापितम्। मुख्यातिथिरूपेण स्वामिनारायणवेदान्त-प्रस्थानत्रयभाष्यकाराः साधुभद्रेशदासमहाराजाः आसन्। स्वामिभिः भारतीयप्राचीनशास्त्रपरम्परायां पारम्परिक-शास्त्राणां संरक्षणाय संवर्धनाय च शास्त्रचर्चायाः महत्त्वं समुद्घोषितम्। कार्यक्रमान्ते BAPS स्वामिनारायणसंस्कृत-महाविद्यालयस्य प्राचार्यः साधु-आत्मतृप्तदासः समेभ्यो धन्यवादान् प्राकटयत्।

## पुराणसङ्काय-शास्त्रपुनश्चर्याकार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुराणसङ्कायेन २० तः २२ जनवरी २०१६ पर्यन्तं दिवसत्रयव्यापिनी एका कार्यशाला सारङ्गपुरस्थे B A P S स्वामिनारायणमन्दिरे आयोजिता। कार्यशालायाः उद्घाटनं जनवरीमासस्य २० तमे दिनाङ्के प्रातः ९ वादने BAPS स्वामिनारायणमन्दिरस्य परिसरे दीपप्रज्वालनेन सह अभूत्। अस्मिन् उद्घाटनसमारोहेऽस्मिन् आर्ष-अक्षरधाम्नः निदेशकाः साधु-श्रुतिप्रकाश- दासमहाराजाः मुख्यातिथिरूपेण आसन्। स्वामिनारायणवेदान्तप्रस्थान- त्रयभाष्यकाराः साधुभद्रेशदासमहाराजाः, B A P S स्वामिनारायण-संस्कृतमहाविद्यालयस्य प्राचार्याः साधु-आत्मतृप्तदासमहाराजाः, दर्शनसङ्कायाध्यक्षाः डॉ. जानकीशरणमहोदयाः, पुराणसङ्कायाध्यक्षाः डॉ. अमृतलालभोगायतामहोदयाः, अन्ये च विद्वांसोऽध्यापकाः छात्राः नागराश्च उपस्थिताः आसन्। तत्रादौ डॉ. अमृतलालभोगायतामहोदयाः सर्वेषां महानुभावानां कृते उपस्थितानां छात्राणां कृते च स्वागतवचांसि प्राकटयन्। डॉ.



दर्शनपुराणसंकायकार्यशालयोः उद्घाटनसत्रे उपस्थिताः प्राध्यापकाः

जानकीशरणमहोदयाः अस्याः कार्यशालायाः प्रास्ताविकं स्वरूपञ्च प्रास्तुवन् । पुराणसङ्कायस्य अस्यां कार्यशालायां नव व्याख्यानानि सञ्जातानि। अस्यां कार्यशालायाम् इमे विद्वांसो व्याख्यानमकार्षुः -

१. डॉ. अमृतलाल भोगायता (श्रीसोमनाथसंस्कृतविश्वविद्यालयः)
२. पू. भक्तिसागरदासः (BAPS स्वामिनारायणसंस्कृतमहा-विद्यालयः, सारंगपुरम्)
३. श्री जितेन्द्रव्यासः (श्रीनारायणसंस्कृतमहाविद्यालयः ,पेटलाद)
४. पू. श्रुतिप्रकाशदासः (अक्षरधाम, गांधीनगरम्)
५. साधुः ज्ञानवर्धनदासः(B A P S स्वामिनारायणसंस्कृत-महाविद्यालयः, सारंगपुरम्)
६. श्री लाभशङ्करपण्ड्या (श्रीवरन्तुसंस्कृतमहाविद्यालयः, सोला)
७. साधुः आत्मतृप्तदासः(B A P S स्वामिनारायणसंस्कृतमहा-विद्यालयः, सारंगपुरम्)
८. डॉ. योगेशपण्ड्या (श्रीवरन्तुसंस्कृतमहाविद्यालयः, सोला)९. श्रीलक्ष्मीनारायणः (दर्शनम् संस्कृतमहाविद्यालयः, छारोडी)

इयञ्च शास्त्रचर्चा दर्शनशास्त्रेण सहैवावर्तत तस्मादत्र आरम्भसत्रं समापनसत्रञ्च सम्भूयायोजितमासीत्, तस्माद् तद्वदेव ज्ञेयम्।

## साहित्यसङ्काय-शास्त्रपुनश्चर्याकार्यशाला




साहित्यसङ्कायकार्यशालायाः उद्घाटनसत्रे समुपस्थिताः महानुभावाः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य साहित्यसङ्कायेन दिनत्रयव्यापिनी शास्त्रपुनश्चर्याकार्यशाला २९-२-२०१६ तः २-३-२०१६ दिनाङ्कं यावत् नडियादस्थ- ब्रह्मर्षिसंस्कारधाम्नि समायोजिता । अस्याः कार्यशालायाः उद्घाटनं पद्मश्री- डाह्याभाई पञ्चोलीमहाभागानां, कुलपतीनां प्रो. अर्कनाथचौधरीमहोदयानां च गौरवमयसमुपस्थतौ २९-२-२०१६ तमे दिनाङ्के प्रातः ९ वादने ब्रह्मर्षिसंस्कारधाम्नः मन्दिरपरिसरे दीपप्रज्वालनेन सार्धं सम्पन्नम् । ब्रह्मर्षिसंस्कार-धाम्नः प्राचार्याः डॉ. कृष्णप्रसादनिरौलाः, साहित्यसङ्काया-ध्यक्षाः डॉ. नरेन्द्रकुमार एल. पण्ड्यामहोदयाः, अन्ये च विद्वांसोऽध्यापकाः छात्राश्च उपस्थिताः आसन् । डॉ. ललितकुमारपटेलः अस्य उद्घाटनसत्रस्य सञ्चालनम् अकरोत् । अस्यां कार्यशालायां मम्मटकृतकाव्यप्रकाशस्योपरि नव व्याख्यानानि सञ्जातानि । प्रतिव्याख्यानं सार्धैकहोराव्यापि आसीत् । अस्यां कार्यशालायां गृहीतव्याख्यानविवरणम् इत्थं वर्तते-

१.डॉ. नरेन्द्रकुमार पण्ड्या - शब्दार्थनिर्णयः अर्थव्यञ्जकता
२. डॉ. कृष्णप्रसादनिरौला - रसविषयः
३.डॉ. महेन्द्रकुमारदवे - काव्यप्रकाशस्य प्रथमोषष्ठश्लोकासै
४. डॉ. नरेन्द्रकुमार एल्. पण्ड्या - शब्दार्थनिर्णयः
५. डॉ. डाह्यालालमोकरिया - रसस्वरूपम्
६. डॉ. कृष्णाप्रसादनिरौला - रसाभासादयः
७. डॉ. ललितकुमारपटेलः - गुणीभूतव्यङ्ग्यभेदाः
८. प्रा.कालिदासठाकरः - व्यञ्जनायाः स्थापना
९. डॉ. ललितकुमारपटेलः - पञ्चमोल्लासः

इयञ्च शास्त्रचर्चा समापनसत्रेण प्रमाणपत्रपुरस्कार-वितरणेन सह २-३-२०१६ तमे पूर्णतां याता।

## व्याकरणसङ्काय-शास्त्रपुनश्चर्याकार्यशाला

२०१६ तमस्य वर्षस्य फरवरीमासस्य २६, २७, २८ दिनाङ्केषु पोरबन्दरस्थितस्य सान्दीपनिविद्यानिकेतनस्य पुण्ये परिसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य व्याकरण-सङ्कायेन व्याकरणपुनश्चर्याकार्यशाला समायोजिता। परमलघुमञ्जूषायाः विभिन्नानां प्रकरणानां चर्चा अस्यां कार्यशालायां संजाता। कार्यशालायामस्यां विश्वविद्यालय-सम्बद्धेषु विभिन्नेषु संस्कृतमहाविद्यालयेषु व्याकरणशास्त्रम् अध्यापयन्तः गुरवः, व्याकरणशास्त्रे अनुसन्धानरताः छात्राः च भागम् अवहन्। कार्यशालायाः उद्घाटनं श्रीबाबडेश्वर-संस्कृतमहाविद्यालयस्य विद्यार्थिभिः वेदघोषेण कृतम्। वरिष्ठाः गुरवः डॉ गौरीशङ्कर जोशी समागतानां महानुभावानां स्वागतं व्याहरन्। ततः विश्वविद्यालयस्य व्याकरणासङ्कायस्य अध्यक्षाः प्रोफेसर विनोद कुमार झा महाभागाः प्रास्ताविकं भाषणम् अकुर्वन्। तदनु सारस्वतातिथित्वेन सम्प्राप्ताः श्रीबाबडेश्वरसंस्कृतमहा-विद्यालयस्य निवृत्ताः गुरवः श्रीमन्तः बोबडे महाभागाः ईदृश्याः कार्यशालायाः महत्त्वं प्रत्यपादयन्। महाविद्यालयस्य प्राचार्यचराः श्रीकृष्ण मिश्र महाभागाः अस्य कार्यक्रमस्य आध्यक्ष्यम् अवहन्। कार्यक्रमान्ते महाविद्यालयस्य गुरवः डॉ फाल्गुन मोढा महाभागाः कार्तज्ञ्यं समार्पयन्। विश्वविद्यालयस्य अनुस्नातकविभागे अध्यापनरतः डॉ दीपेश विनोद कतिरा महोदयः अस्य कार्यक्रमस्य सञ्चालनम् अकरोत्।



व्याकरणसङ्कायकार्यशालायाः उद्घाटनसत्रे मञ्चस्थाः महानुभावाः

कार्यशालायाः अङ्गतया कृतानां व्याख्यानानां विवरणम् इत्थम् अस्ति -

| व्याख्याता | विषयः |
|---|---|
| प्रो. विनोद कुमार झा | धात्वर्थनिर्णयः |
| डॉ गौरीशङ्कर जोषी | निपातार्थनिर्णयः |
| डॉ मनोज कुमार द्विवेदी | कारकार्थनिर्णयः |
| श्रीमान् अश्विन भाई राजगोर | स्फोटनिरूपणम् |
| डॉ क्षितीश्वरनाथ पाण्डेयः | शक्तिनिरूपणम् |
| डॉ ज्ञानेन्द्र सापकोटा | नामार्थनिरूपणम् |
| डॉ फालगुन मोढा | दशलकारादेशार्थनिरूपणम |
| डॉ दीपेश विनोद कतिरा | लक्षणानिरूपणम् |
| डॉ श्रीकृष्ण मिश्र | समासादिवृत्त्यर्थनिरूपणम् |
| डॉ नरसिंहभाई भोगायता | आकाङ्क्षानिरूपणम् |
| प्रोफेसर कमलेश चोक्सी | लकारार्थनिरूपणम् |

कार्यशालायाः समारोपकार्यक्रमे डॉ गौरीशङ्कर जोषी महोदयः समागतानां मान्यवराणां शाब्दिकं स्वागतम् अकरोत्। कार्यक्रमे विशिष्टातिथित्वेन सम्प्राप्ताः श्रीबाबडेश्वरसंस्कृतमहाविद्यालयस्य प्राचार्याः श्रीमन्तः बिपिन भाई जोषी महाभागाः अस्यां कार्यशालायां भागग्राहित्वेन अपि समुपस्थिताः आसन्। तैः महाविद्यालयीयानां प्राध्यापकानां कृते अस्याः कार्यशालायाः उपकारकत्वं महता कण्ठेन प्रतिपादितम्। ततः कार्यशालायां भागग्राहित्वेन समुपस्थितः मगोदस्थस्य संस्कृतमहाविद्यालयस्य व्याकरणाध्यापकः डॉ मनोज कुमार द्विवेदी महोदयः कार्यशालायाः विषये स्वीयां प्रतिस्पन्दम् अश्रावयत्। तदनु व्याकरणशास्त्रे अनुसन्धानरतः श्रीमान् परेश पण्ड्या महोदयः कार्यशालायाम् उपस्थित्या स्वानुभूतानां लाभानां विषये अवदत्। तदनु सारस्वतातिथित्वेन मार्गदर्शनार्थं समागताः गुजरातविश्वविद्यालयस्य भाषाभवने कार्यरताः व्याकरणशास्त्रे कृतभूरिपरिश्रमाः प्रोफेसर कमलेश चोक्सी महोदयाः स्वीये व्याख्याने संस्कृताध्ययने विवक्षा जिज्ञासा चेत्येतयोः महत्त्वं प्रत्यपादयन्। ततः कार्यक्रमस्य अध्यक्षाः प्रोफेसर विनोद कुमार झा महाभागाः व्याकरणाध्ययनसन्दर्भे श्रवणसंस्कारस्य महत्त्वं प्रत्यपादयन्। डॉ फाल्गुन मोढा महाभागेन कार्तज्ञ्यज्ञापनपुरःसरं कार्यक्रमः समाप्तिं नीतः। कार्यक्रमस्यास्य सञ्चालनमकरोत् डॉ दीपेश विनोद कतिरा महोदयः।

## वेदवेदाङ्गसंकायस्य शास्त्रपुनश्चर्याकार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदवेदाङ्गसङ्कायः पारम्परिकशास्त्राणां संरक्षणाय संवर्धनाय अभ्यासाय च १९ तः २१ फरवरी २०१६ पर्यन्तं वेदवेदाङ्गसङ्कायस्य सर्वान् विषयान् केन्द्रीकृत्य दिवसत्रयव्यापिनी एका कार्यशाला सामख्याली संस्कृतमहाविद्यालये सम्पन्ना जाता । एतादृश्यां महत्त्वपूर्णकार्यशालायां विश्वविद्यालयसम्बद्धमहाविद्यालयेषु चतुर्विंशति विद्वांसोऽध्यापकाः भागं गृहीतवन्तः । कार्यक्रमस्य प्रारम्भः सन्त श्रीसन्ध्यागिरीबापुसंस्कृतवेदविद्यालयस्य स्वामिचरणाः प्रदीपप्रज्वालनपूर्वकं कृतवन्तः । अनन्तरं वैदिकमङ्गलाचरणम् सन्तश्रीसन्ध्यागिरीबापुसंस्कृतवेदविद्यालयस्य छात्रैः अध्यापकैश्च कृतम् । अस्य कार्यक्रमस्य संयोजकः वेदवेदाङ्गसङ्कायस्याध्यक्षः शत्रुघ्नपाणिग्राही शाब्दिक-स्वागतम् परिचयप्रदानं तथा कार्यक्रमस्य उद्येश्यकथनं कृतवान् । तदनन्तरं माननीयानां कार्यक्रमस्य मुख्यातिथीनां डॉ.नरेन्द्रभाईपण्ड्यामहोदयानाम् अभिभाषणं जातम् । कार्यक्रमस्य विशिष्टातिथीनाम् अनुस्नातकभवनस्य अध्यक्ष-पादानां प्रो.देवेन्द्रनाथपाण्डेयमहाभागानां प्रासङ्गिकप्रवचनम् संजातम् । अनन्तरम् अधोलिखिताः कार्यक्रमाः दिवसत्रयं यावदनुष्ठिताः -

**डॉ. नरेन्द्रकुमारपण्ड्या** - निरुक्त-प्रथमाध्यायस्य १-२ पादौ, सप्तमाध्यायस्य तृतीयचतुर्थपादौ

**डॉ. रमेशचन्द्रशुक्लः** - बृहत्पाराशरहोराशास्त्रस्य सृष्टिक्रमवर्णनाध्यायः, अवतारक्रमवर्णनाध्यायः

**डॉ. राजेन्द्रकुमारपण्ड्या** - निरुक्तस्य प्रथमाध्यायस्य तृतीयचतुर्थपादौ

**श्री उमाशंकर** - झा बृहत्पाराशरहोराशास्त्रस्य ग्रहस्वरूपवर्णनाध्यायः, ग्रहादिसाधनाध्यायः

**डॉ. शत्रुघ्नपाणिग्रही** - निरुक्तस्य प्रथमाध्यायस्य पञ्चमषष्ठपादौ

**डॉ. राजेन्द्रप्रसादशुक्लः** - बृहत्पाराशरहोराशास्त्रस्य राशिलीलाध्यायः, षोडशवर्गवर्णनाध्यायः

**डॉ. अश्विनभाईराजगोर** - बृहत्पाराशरहोराशास्त्रस्य वर्गविवेचनाध्यायः, दृष्टिभेदवर्णनाध्यायः

**प्रो. देवेन्द्रनाथपाण्डेयः** - निरुक्तस्य सप्तमाध्यायस्य प्रथमद्वितीयपादौ

**प्रो. हरिप्रसादपाण्डेयः** - बृहत्पाराशरहोराशास्त्रस्य सूतिकाध्यायः, अरिष्टचनाध्यायः



वेदवेदाङ्गसङ्कायकार्यशालायाः उद्घाटनसत्रे मञ्चस्थाः महानुभावाः

## श्रीसोमनाथसंस्कृतविश्वविद्यालये सम्पन्ना पी.जी.डी.सी.ए पाठ्यक्रम-संयोजकानां कार्यशाला




विज्ञान-अभिनवविद्यासङ्कायकार्यशालायाः उद्घाटनसत्रे मञ्चस्थाः महानुभावाः

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् इति श्रुत्युपदेशानुगुणं नित्यमध्यापनकार्ये व्यापृतानां स्वाध्यायोऽपीष्टः। इत्थमेव मनसि निधाय श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य 'विज्ञान एवम् अभिनवविद्या' इत्याख्येन संकायेन द्विसहस्राधिके षोडषे वर्षे जनवरीमासस्य षष्ठ-सप्तम-दिनयोर्श्विश्वविद्यालयस्य शैक्षणिकभवने पी.जी.डी.सी.ए पाठ्यक्रमस्य संयोजकानां कार्यशाला समायोजिता। कार्यशालाया अस्या उद्घाटनावसरे सङ्कायस्याध्यक्षा प्रोफेसर अर्चना दुबे महाभागा संकायस्य अस्य सङ्क्षिप्तम् इतिहासं संश्राव्य कार्यशालाया उद्दिष्टानि स्पष्ट्यकरोत्। विश्वविद्यालयस्य कुलसचिववर्यः डॉ. दशरथ जादव महाभागः कार्यक्रमेऽध्यक्षत्वेन समुपातिष्ठत्। पी.जी.डी.सी.ए परीक्षा इतोऽपि सुचारुतया भवन्त्वित्युद्देश्येन विश्वविद्यालयेन ऑन लाईन परीक्षापद्धतिराश्रयिष्यत इति समुद्घोषितम्, कार्यशालायाः साफल्याय शुभाकामनाश्च प्रकटिताः। विशिष्टमार्गदर्शनाय विश्वविद्यालयस्यानु-स्नातकविभागाध्यक्षः देवेन्द्रनाथपाण्डेयमहोदयः, विश्वविद्यालय-सञ्चालितस्य संस्कृतमहाविद्यालयस्य प्राचार्यः प्रोफेसर नरेन्द्र पण्ड्या महाभागः च समुपातिष्ठत्। पण्ड्यामहाभागेन गीर्वाणवाण्या सङ्गणकस्य आविष्कर्तुर्मनुजचेतसि विद्यमानस्य महासङ्गणकस्य वर्णनं प्रस्तुतम्। पाण्डेयमहाभागेन आङ्ग्लभाषया भागग्राहिणः सम्बोधिताः। सर्वैरपि महानुभावैः कार्यशालाया निर्विघ्नपरिसमाप्तये आशीर्वचांसि व्याहृतानि। कार्यक्रमान्ते महाविद्यालयस्य प्राध्यपकेन डॉ. ललित पटेल महाभागेन कार्तज्ञं वितीर्णम्। कार्यक्रमस्यास्य सञ्चालनं व्याकरणाध्यापकेन डॉ. दीपेशकतिरामहोदेयन कृतम्। राजकोटस्थस्य मारवाडीमहाविद्यालयस्य एम्.सी.ए सङ्कायाध्यक्षः श्रीधरन् राजगोपाल महोदयः, गान्धिनगरस्थयां चौधरी टेक्निकल इन्स्टिट्यूट् संस्थायां सहायकाचार्यः विनोदपिल्लैमहोदयः, वेरावलस्थात् सवजाणीमहाविद्यालयात् शक्तिभट महाभागः, जूनागढस्थात् स्वामिनारायणगुरुकुलात् मिलिन्दभाई महोदयः च कार्यशलायामस्यां समुपस्थाय भागग्राहिणः अबोधयन्। अस्याः कार्यशालायाः समापनावसरे श्रीसोमनाथसंस्कृतविश्वविद्या-लयस्य मान्यः परीक्षानियामकः डॉ. योगेश पटेल महोदयः, प्रोफेसर देवेन्द्रनाथ पाण्डेय महोदयः, विनोद पिल्लै महोदयः च भागग्राहिणः अबोधयन्, प्रमाणपत्राणि च व्यतरन्। कार्यक्रमे सञ्चालनं, धन्यवादवितरणं च कृतवती प्रोफेसर अर्चना दुबे महाभागा।

SCOPE
Society for Creation of Opportunity through Proficiency in English
A Government of Gujarat Initiative

**Introduction :** SCOPE (Society for Creation of Opportunity through Proficiency in English) has been setup by the Government of Gujarat to build English language proficiency in the youth of Gujarat and thereby create employment opportunities for them. It is one of the most successful PPP models in the state with an established network of 300+ centers through five Zonal Training Partners (ZTPs) for the purpose of providing English language training to candidates. More than 700 institutions of higher education are also SCOPE centres. SCOPE programme is centred on three challenges of education - Access, Equity and Quality.

**Assessment and Certification by Cambridge University :** To enhance the employability and to showcase the proficiency of English, SCOPE has roped in Cambridge English, part of the University of Cambridge, UK as assessment partner. Cambridge English exams are the world's leading range of certificates for learners of English. The English Language Training programme is being developed on the Common European Framework (Level A1 to C2) of Reference. SCOPE has fully adopted Computer based and Online Exams called BULATS (Listening, Reading and Speaking) and CPT (Listening, Reading). There are multiple exam cycles in a year.

**Affordability :** Fee from level A1 to level B2 training is kept at Rs. 1550/- (taxes extra) under PPP model. This includes training to candidate, course material, assessment & certification. SCOPE's OAS (Open Assessment Scheme) is for students only wherein they can pay a nominal fee of Rs. 350/- for 'A' level exam and Rs. 600/- for 'B' level exam. Providing course material or training material is not mandatory. However, colleges have option of providing them training and material at a fee of Rs. 750/- for 'A' level and Rs. 1200/- for 'B' level exam which is much cheaper than prevailing rates of other private institutes.

महाराजासयाजीरावविश्वविद्यालय द्वारा हंसामहेताग्रन्थालये ‘National Workshop on Institutional Digital Repository for National Digital Libary” इत्यस्मिन् विषये समायोजिते त्रिदिवसीय-राष्ट्रियकार्य-शालायां श्रीरवीन्द्रकालेमहोदयः (ग्रन्थपालः) एवं श्री हरेशखेरमहोदयः (Computer. Programmer) भागं गृहीतवन्तौ ।

# विश्वयोगदिवसः - २०१६



विश्वयोगदिवसस्य उद्घाटनं कुर्वन्तः कुलपतयः

२१ जून-२०१६ इति दिनाङ्के योगदिवसं लक्ष्यीकृत्य श्रीसोमनाथसंस्कृतविश्वविद्यालयः गीर-सोमनाथ जनपदस्थानां क्रीडाशिक्षकानां १५/०६/२०१६ तः १७/०६/२०१६ दिनाङ्कं यावत् दिनत्रयव्यापिनं योग-प्रशिक्षणमकरोत्। विश्वविद्यालय-पक्षतः डॉ. जयेशमुंगरा कार्यक्रमेऽस्मिन् प्रशिक्षकः आसीत् । किं च विश्वविद्यालयस्य योगान्तेवासिनोऽपि अध्यापकाश्च २०/०६/२०१६ दिनाङ्कं यावत् अनया रीत्यैव योगशिक्षणं प्राप्नुवन्। पुनश्च जूनमासस्य २१ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये प्रातः सप्तवादनतः अष्टवादनं यावत् योगदिवसस्य आचरणं समजायत। तत्र समुपस्थिता आसन् विश्वविद्यालयस्य कुलपतयः प्रो.अर्कनाथचौधरीमहोदयाः, कुलसचिवाः डॉ. दशरथजादवमहोदयाः, प्राचार्याः डॉ. नरेन्द्रकुमारपण्ड्या, अन्ये चाध्यापकाः । कार्यक्रमेऽस्मिन् विश्वविद्यालस्याधिकारिणः कर्मचारिणः अध्यापकाः छात्राः तथा विविधेभ्यः विद्यालयेभ्यः समागताः विद्यार्थिनः, वेरावलस्य पौराश्च भागं गृहीतवन्तः । आहत्य १८०५ जनाः संभूय निर्दिष्टालोके योगासनप्राणायामादिकम् अकुर्वन् । अस्य कार्यक्रमस्य 'नोडल ओफिसर ' रूपेण डॉ. नरेन्द्रकुमारपण्ड्यामहोदयाः आसन् । डॉ. जयेशमुंगरा अस्य समग्रस्य कार्यक्रमस्य संयोजकरूपेण कार्यम् अकरोत् । अस्यैव कार्यक्रमस्याङ्गतया प्रातः विश्वविद्यालयस्य शैक्षणिकभवने योगविषयकानि त्रीणि व्याख्यानानि जातानि। तत्र



विश्वविद्यालये योगासनं कुर्वन्तः छात्राः अध्यापकाः कर्मचारिणः नागराश्च

डॉ. जानकीशरणमहोदयेन "पातञ्जलयोगदर्शने अष्टांगयोगस्य अवधारणा" इति विषये तथा डॉ. चन्द्रकान्तपटेलः, श्रीमतीतेजलबेनसवजाणी इत्येताभ्यां "प्राणायामः ध्यानश्च" इति विषये व्याख्यानं प्रदत्तम् ।




## Shree Somnath Sanskrit University, Veraval

(Established by Government of Gujarat)

## UGC - NET / SET Training Programme

(Sponsored by Knowledge Consortium of Gujarat, Govt. of Gujarat)

FREE COACHING

Paper - I For all Subjects & all Disciplines
Paper - II For Sanskrit (Code 25 & 73)
Paper - III For Sanskrit (Code 25 & 73)

Note : Students of any College or Institute can join this free UGC NET/SET coaching classes.
UGC NET/SET free coaching classes have already begun from 02.09.2016, so hurry up and take an opportunity by joining free coaching classes for your higher academic career.

Contact us for Free Registration

Prof. Vinod Kumar Jha
Convener
Mobile : 87350 76657

Dr. Janakisharan Acharya
Co-Convener
Mobile : 87588 17525

Place :

Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Near Birla Temple, Veraval - 362266